**SK-103 छान्दोग्योपनिषदि 6,7,8 अध्यायाः शाङ्करभाष्योपेताः**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) निचैः यथाकामं पञ्च मन्त्राः पूर्यन्ताम्। 1x5=5**

1) येनाश्रुतं..........भवतीति॥
2) ता आप ऐक्षन्त बह्व्यः स्याम............जायते॥
3) एतद्ध स्म वै तद्विद्वांस................ह्येभ्यो विदाञ्चक्रुः॥
4) तेजोऽशितं त्रेधा............सा वाक्॥
5) नाम वा ऋग्वेदो......वेदानां वेः॥
6) अस्ति भगवो मनसो........ब्रवीत्विति॥
7) स यः सङ्कल्पं ब्रह्मेत्युपास्ते...........अभिसिद्ध्यति।

**B) अधस्ताद् वाक्येनैकेन पञ्चानाम् उत्तरं लिखत। 1x5=5**

1) अद्वितीयमिति शब्देन किं प्रतिषिध्यते ?
2) सुषुप्तादौ सत्सम्पन्ना व्याघ्रादयः कथं पुनः व्याघ्रत्वादिनैव उत्तिष्ठन्ति ?
3) लवणोपमानेन किं प्रतिपिपादयिषितम् ?
4) ब्रह्मचर्यशब्दस्य अर्थः कः ?
5) वागिन्द्रियं शरीरे कुत्र स्थितं वर्तते ?
6) मनो हि आत्मा इति कुतः उच्यते ?
7) अपराजिता पूः का?

**C) अर्वाक् यथारुचि पञ्च भाष्यदिशा विव्रियन्ताम्। 3x5=15**

1) गुरुकुलात् प्रत्यागतस्य श्वेतकेतोः वर्तनं प्रदर्शयत।
2) प्राणानाम् अम्मयत्वं अपां च त्रेधा विभागं प्रदर्शयत।
3) शकुनिदृष्टान्तेन सुषुप्तौ जीवस्थितिं वर्णयत।
4) मुमूर्षोः दृष्टान्तेन वागादीनां लयक्रमं प्रदर्शयत।
5) ज्ञानोदयसमनन्तरमेव सर्वकर्मक्षयाङ्गीकारे का आपत्तिः?
6) स्वमहिम्नि प्रतिष्ठितः भूमा इत्युक्त्वा पुनः अप्रतिष्ठितः इति कुतो वदति श्रुतिः?

7) अहङ्कारादेशः किमर्थं क्रियते?

**D) निम्नलिखितेषु यथाच्छन्दं त्रयः यथाभाष्यं समाधेयाः।** **5x3=15**

1) एकविज्ञानेन सर्वविज्ञानप्रतिज्ञां दृष्टान्तैः द्रढयत।

2) पुरुषस्य षोडशकलात्मकतां गमयत।

3) नारदस्य गुरूपसदनं विवृणुत।

4) विपरीग्राहिणौ इन्द्रविरोचनौ निवर्तमानौ कुतः प्रजापतिना न निवारितौ?

5) यज्ञ-सत्रायणादिकं ब्रह्मचर्यमेव इत्यस्य क आशयः?

**E) नीचैः प्रदत्तयोः अनुप्रियमेकं सभाष्यम् अनुबध्नीत।** **10x1=10**

1) भूमब्रह्मप्राप्तिक्रमं विवृणुत।

2) इन्द्रस्य भ्रमग्रहणं प्रजापतिः कथम् अपास्यदिति विवृणुत।

***

RKMVERI/DSS/MAIS/15-20/J2019/SK-104

**SK-104 बृहदारण्यकोपनिषदः शाङ्करभाष्यम्(3,4)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश प्रश्नाः समाधेयाः। 1x10=10**

1) वेदान्तिनां नये नित्यकर्मणां फलं किम् ?
2) आरुणियाज्ञवल्क्ययोः संवादः तृतीयाध्यायस्य कस्मिन्ब्राह्मणे उपलभ्यते ?
3) रुद्राः कति? के ते ?
4) पुण्यस्य च पर उत्कर्षः कः ?
5) किं नाम शस्त्रम् ?
6) "न दृष्टेः द्रष्टारं पश्येः" अत्र भर्तृप्रपञ्चमतं किम् ?
7) किं नाम बलम् ?
8) अष्टसंख्याकाः ग्रहाः के ?
9) इन्द्रः कः ?
10) यज्ञे चत्वारः ऋत्विजः के ?
11) षड्देवाः के ?
12) अष्टमब्राह्मणं किमर्थमारब्धम् ?

**B) यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1) यदिदं सर्वं मृत्युनाप्तं सर्वं मृत्युनाभिपन्नं केन यजमानः...।
2) यदिदं सर्वं मृत्योरन्नं का स्वित्सा देवता..।
3) तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य..।
4) एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तम्।
5) यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद।
6) कतमे रुद्रा इति दशेमे पुरुषे प्राणाः।
7) तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ..।

**C) यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1) कहोलब्राह्मणदिशा पारिव्राज्यविधेः कर्मविधिविरोधाविरोधविचारः।

2) शाकल्यब्राह्मणानुसारं देवताभेददर्शनपूर्वकं ब्रह्मस्वरूपप्रतिपादनम्।

3) आश्वलब्राह्मणतात्पर्यार्थः।

4) उषस्तब्राह्मणानुसारं चिदात्मनः सर्वान्तरत्ववर्णनम्।

5) चतुर्थाध्यायस्य द्वितीयब्राह्मणानुसारं जनकं प्रति याज्ञवल्क्योपदेशः।

**D) अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) याज्ञवल्क्यार्तभागसंवाददिशा ग्रहातिग्रहरूपमृत्युं व्याख्याय विद्वत्पुरुषस्य प्राणादयः उत्क्रामन्ति आहोस्विन्नेति परामर्शयत।

2) अष्टमब्राह्मणमुखेन गार्गिकृतप्रश्नद्वयं सोत्तरं व्याख्यात।

***

RKMVERI/DSS/MAIS/14-19/J2019/SK-107

## SK-107 केनोपनिषत् ऐतरेयोपनिषत् च सशाङ्करभाष्ये

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1) केनोपनिषत् इति उपनिषन्नाम किमर्थम्?
2) इदन्द्र नाम कस्य?व्युत्पत्तिं लिखत।
3) विदृतिः का?
4) सूर्य आत्मा जगतः इति वाक्यं कस्य वेदस्य?
5) कः सर्वज्ञस्वभावः?
6) कर्म कदा परिसमाप्यते?
7) ऐतरेयोपनिषत् केन वेदेन सम्बद्धा?
8) ऋग्वेदस्य महावाक्यं किम्?
9) प्रत्यगात्मविज्ञानं श्रोतुं मन्तुं विज्ञातुं कस्य सामर्थ्यमुपपद्यते?
10) इष् धातोः कौ अर्थौ केन इषितमिति स्थले न गृह्येते इति भाष्यकारः?
11) परः परमात्मा केन प्रमाणेन प्रत्याययितुं शक्यः?
12) अविदितादधि इत्यत्र अधिशब्दार्थः कः?

**B) निम्नलिखितेषु यथारुचि पञ्च भाष्यदिशा विव्रियन्ताम्। 3x5=15**

1) अशनापिपासयोः विभागं कुरुत।
2) वामदेवोक्तिं सप्रसंगं प्रदर्शयत।
3) अध्यात्मब्रह्मोपासनप्रकारं वर्णयत।
4) कस्मादिन्द्रः अन्यान् देवान् अतिशेरते इति सप्रसंगं वर्णयत।
5) अग्निवाय्वोः गर्वहरणप्रसंगं वर्णयत।
6) अग्न्यादि देवताप्ययलक्षणापि गतिः संसारदुःखोपशमाय नालमिति यथाप्रसंगं वर्णयत।
7) अग्निर्वाग्भूत्वा इत्यादि मन्त्रार्थं वर्णयत।

**C) अत्र यथाच्छन्दं त्रयः यथाभाष्यं समाधेयाः। 5x3=15**

1) अम्भादिलोकानां सृष्टिं वर्णयित्वा तत् तत् स्थानं निर्दिशत।

2) देवतानामन्नायतनयोः याचनाप्रसंगं वर्णय़त।

3) विद्याञ्चाविद्याञ्च इति मन्त्रार्थम् ऐतरेयदिशा विवृणुत।

4) स म आत्मेति वेदनं कथमिति आख्यायिकाद्वारा वर्णयत।

5) केनेषितमिति मन्त्रार्थं यथाभाष्यं वर्णयत।

**D) अधस्ताद् अनुप्रियमेकं सभाष्यम् अनुबध्नीत। 10x1=10**

1) इन्द्रादीनां गर्वहरणवृत्तान्तं यथा केनोपनिषत् वर्णयित्वा अध्यात्मिकादि उपासनाप्रकारं गमयत।

2) ऐतरेयोपनिषदनुसारेण ज्ञानकर्मसमुच्चयवादं खण्डयत।

***

# SK-107 केनोपनिषत् ऐतरेयोपनिषत् च सशाङ्करभाष्ये

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1) सोयमात्मा पुण्येभ्यः प्रतिधीयते इत्यत्र प्रतिधीयते इत्यस्य कः अर्थः ?
2) आत्मनः ईक्षणव्यापारबोधिका ऐतरेय श्रुतिः का ?
3) नान्यत्किञ्चनमिषत् इत्यत्र मिषत् इत्यनेन कस्य निराकरणं क्रियते ?
4) अन्नं सिसृक्षुः ईश्वरः किमुद्दिश्य अभ्यतपत् ?
5) विदृतिः का ?
6) मूर्ध्नः विदृतिः नाम कस्मात् ?
7) ब्रह्म ततममपश्यत् इत्यस्य कः अर्थः ?
8) इदन्द्रः इत्यस्य शब्दार्थः कः ?
9) परोक्षप्रियाः के ?
10) श्रौतानि स्मार्तानि च कर्माणि किमर्थं भवन्ति ?
11) इषितमिति छान्दसप्रयोगस्य लोके किं रूपम् ?
12) अस्माल्लोकात् प्रेत्य इत्यत्र लोकशब्देन कस्य ग्रहणम् ?

**B) निम्नलिखितेषु यथारुचि पञ्च भाष्यदिशा विव्रियन्ताम्। 3x5=15**

1) इन्द्रियगोलकानां, इन्द्रियाणां,तदधिष्ठातृदेवतानां चोत्पत्तिं ऐतरेयानुसारं वर्णयत।
2) गवाश्वशरीरयोः निराकरणप्रसंगं वर्णयत।
3) नाहं मन्ये सुवेदेति मन्त्रार्थं वर्णयत।
4) वायोः गर्वहरणवृत्तान्तं सप्रसंगं वर्णयत।
5) इन्द्रस्योमादर्शनप्रसंगं वर्णयत।
6) विराटपुरुषोत्पत्तिमैतरेयदिशा व्याख्यात।
7) जीवसृष्ट्युत्तरमन्नादिसृष्टिकर्तृत्वे ईश्वरस्य स्वातन्त्र्यं सिद्ध्यति इति सप्रसंगं वर्णयत।

**C) अत्र यथाच्छन्दं त्रयः यथाभाष्यं समाधेयाः। 5x3=15**

1) देवतानां स्वायतनप्रवेशश्रुतिं व्याख्यात।

2) अधिदैवरूपेण ब्रह्मोपासनं यथाकेनोपनिषत् वर्णयत।

3) उक्ता ते उपनिषदिति गुरोः वाक्यं विचारयत।

4) तस्यै तपो दमः कर्म इत्यादिमन्त्रेण विद्यासाधनमुपदिशत।

5) प्रतिबोधविदितमिति मन्त्रार्थं संगृह्णीत।

**D) अधस्ताद् अनुप्रियमेकं सभाष्यम् अनुबध्नीत।** **10x1=10**

1) ऐतरेयोपनिषदनुसारेण ज्ञानकर्मसमुच्चयवादं खण्डयत।

2) गुरुशिष्यसंवादरूपां केनोपनिषदाख्यायिकां वर्णयत।

***

# SK-126 श्रीमद्भगवद्गीता (१३,१५,१८ शाङ्करभाष्यसमेता)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

## A) एकेन वाक्येन पदेन वा उत्तरत। 1x10=10

1) क्षेत्रं नाम किम् ?
2) क्षेत्रक्षेत्रज्ञौ केन ज्ञानेन विषयीक्रियेते ?
3) "सर्वधर्मान् परित्यज्य...."इति श्लोकं पूरयतु।
4) "ज्योतिषामपि तज्ज्योतिः..."इति श्लोकं पूरयतु।
5) "बहिरन्तश्च भूतानां...."इति श्लोकं पूरयतु।
6) "अमानित्वमदम्भित्वं...."इति श्लोकं पूरयतु।
7) वैराग्यं नाम किम्।
8) एषणात्रयं किम्।
9) प्रकृतिः कुत्र हेतुः।
10) अध्यात्मज्ञानं नाम किम् ?
11) ब्रह्म कुतः सर्वतःपाणिपादम् ?
12) ज्ञानगम्यं नाम किम् ?

## B) सप्तसु पञ्च समासेन विवृणुत। 3x5=15

1) "मद्भावायोपपद्यते...."इति श्लोकार्थं भाष्यदिशा विवृणतु ?
2) पञ्च ज्ञानसाधनानि स्वभाषया आलोचयतु ?
3) सात्त्विकी बुद्धिः कीदृशी भवति।
4) "ध्यानेनात्मनि पश्यन्ति...."इति श्लोकार्थं भाष्यदिशा विवृणतु ?
5) "अधश्चोर्ध्वं प्रसृतास्तस्य...."इति श्लोकार्थं स्वभाषया प्रतिपादयतु?
6) "न तद्भासते सूर्यो...."इति श्लोकार्थं भाष्यदिशा विशदयत?
7) "ममैवांशो जीवलोके...."इति श्लोकार्थं भाष्यदिशा व्याख्यात?

**C) त्रीणि विशदयत।** **5x3=15**

1) ब्रह्मणः सर्वेन्द्रियगुणाभासत्वं स्वभाषया आलोचयत ?
2) “प्रकृतिं पुरुषं चैव.....” इत्यस्य श्लोकस्य अभिप्रायं भाष्यदिशा आलोचयतु?
3) सृष्टेः पूर्वं परं च जगतः स्वरूपं वर्णयतु?
4) “ज्योतिषामपि तज्ज्योतिः....”इति श्लोकार्थं भाष्यदिशा व्याख्यात?
5) “यदा भूतपृथग्भावं ....”इति श्लोकार्थं भाष्यदिशा व्याख्यात?

**D) एकं प्रपञ्चयत।** **10x1=10**

1) “एतावान् सर्वो हि वेदार्थो गीतार्थः च उपसंहृत्य उक्तः।” इति भाष्योक्तिं स्वभाषया प्रतिपादयत?
2) ज्ञानसाधनानां स्वरूपं विवृणतु?

***

RKMVERI/DSS/MAIS/2016-21/J2019/SK-131

## SK-131 ब्रह्मसूत्रे १.१,२ सशाङ्करभाष्यम्।

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

### A) यथाकामं दश प्रश्नान् उत्तरत। 1x10=10

1) ग्रन्थम् पूरयत – "तमेतमविद्याख्यमात्मानात्मनोः... शास्त्राणि चेति"
2) ग्रन्थम् पूरयत – "उच्यते, देहेन्द्रियादिषु... व्यापारः सम्भवति"
3) ग्रन्थम् पूरयत – "आह कोऽयमध्यासो... भ्रम इति"
4) अध्याससम्भावनाग्रन्थे कस्य नियमस्याभावं वदन्ति भगवत्पादाः।
5) असत्ख्यातिवादिनः के।
6) जीवमुख्यप्राण... – सूत्रम् पूरयत।
7) छन्दोभिधानात्... – सूत्रम् पूरयत।
8) ज्योतिश्चरणाधिकरणे चरणाभिधानश्रुतिः का।
9) प्राणाधिकरणसूत्रे "अत एव" इत्यंशस्य कोऽर्थः।
10) शास्त्रयोनित्वाधिकरणे योनिशब्दस्य अर्थद्वयं किम्।
11) "तथा च लोकेऽनुभवः" – कीदृशोऽनुभवः।
12) "वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्" – भाष्यकृद्वचनेऽस्मिन् आदिमसूत्रप्रयोगेन को वादः खण्डितः।

### B) यथारुचि पञ्च समाधत्त। 3x5=15

1) इतरेतराध्यासः कः।
2) अध्यासशङ्काग्रन्थस्य तात्पर्यं किम्।
3) "सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि" – तात्पर्यं किम्, कथञ्च तदुपपद्यते।
4) जिज्ञासाधिकरणस्य अथशब्दस्य किं व्याख्यानम्।
5) चतुस्सूत्र्यन्ते भगवत्पूज्यपादैरुद्धृतान् आचार्यसुन्दरपाण्ड्यप्रणीतान् श्लोकान् लिखत।
6) तन्निष्ठस्य मोक्षोपदेशात् – सप्रसङ्गं सूत्रार्थम् प्रदर्शयत।
7) सर्वत्र प्रसिद्धोपदेशादिति सूत्रस्य भाष्ये प्रतिपादितं सिद्धान्तं संक्षिपत।

**C) यथाच्छन्दं त्रीन् व्याख्यात। 5x3=15**

1) आनन्दमयाधिकरणस्य भाष्यकारहृदयानुसारी सिद्धान्तः।
2) जन्माद्यस्य यतः इति सूत्रस्य प्रतिपदार्थः तात्पर्यञ्च।
3) अन्तरधिकरणस्य सूत्राणि पञ्चाङ्गानि च।
4) अत्त्रधिकरणस्य सूत्राणि पञ्चाङ्गानि च।
5) प्रातर्दनाधिकरणस्य सर्वाणि सूत्राणि सतात्पर्यकाणि।

**D) अनुप्रियमेकं व्याख्यात। 10x1=10**

1) प्रासङ्गिकभगवत्पादीयवाक्योद्धारपूर्वकम् अन्यथाख्यातिवादं विविच्य (५-अङ्काः) अध्यासलक्षणं निरूपयत (५-अङ्काः)।
2) ईक्षत्यधिकरणस्य सर्वाणि सूत्राणि सार्थमुल्लिख्य पञ्चाङ्गानि प्रपञ्चयत।

***

**SK-134 ब्रह्मसूत्रशाङ्करभाष्यम्(2.4, 3.1)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश प्रश्नाः समाधेयाः। 1x10=10**

1) द्वितीयाध्यायस्य चतुर्थपादेन किं क्रियते ?

2) सप्तगत्यधिकरणेन कः विषयः परिहृतः ?

3) वागादिभ्यः प्राणः सर्वत्र भेदेन श्रूयते इत्यत्र किं श्रुतिप्रमाणम् ?

4) मुख्योपि प्राणः न जीववत् स्वतन्त्रः, कुतः ?

5) उदानः कः ?

6) संज्ञामूर्तिक्लृप्त्यधिकरणस्य विषयवाक्यं किम् ?

7) 'तस्य च नित्यत्वात्' इत्यत्र कस्य नित्यत्वमुच्यते ?

8) ‘न हिंस्यात् सर्वा भूतानि’ इत्यस्य अपवादः कः ?

9) कस्य मते चरणशब्देन सुकृतदुष्कृते प्रत्याय्येते ?

10) देहान्तरप्रतिपत्तौ प्राणानां गतिबोधिका श्रुतिः का ?

11) योगशास्त्रप्रसिद्धाः मनसः वृत्तयः काः ?

12) संज्ञामूर्तिक्लृप्त्यधिकरणस्य विषयवाक्यं किम् ?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1) गौण्यसम्भवात्।

2) सप्त गतेर्विशेषितत्वाच्च।

3) पञ्चवृत्तिर्मनोवद्व्यपदिश्यते।

4) तस्य च नित्यत्वात्।

5) अशुद्धमिति चेन्न शब्दात्।

6) विद्याकर्मणोरिति तु प्रकृतत्वात्।

7) भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1) प्राणोत्पत्त्यधिकरणम्।

2) ज्योतिराद्यधिकरणम्।

3) तदन्तरप्रतिपत्त्यधिकरणम्।

4) अनिष्टादिकार्यधिकरणम्।

5) कृतात्ययाधिकरणम्।

**D) अधस्ताद् अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1) संज्ञामूर्तिक्लृप्त्यधिकरणदिशा नामरूपव्याकरणकर्तृत्वं विचारयत।

2) अन्याधिष्ठिताधिकरणमाश्रित्य लघून्यासं कुरुत।

***

RKMVERI/DSS/MAIS/14-19/J2019/SK-136

**SK-136 ब्रह्मसूत्रशाङ्करभाष्यम् (3.4, 4.1-4)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश प्रश्नाः समाधेयाः। 1x10=10**

1) 'त्रयो धर्मस्कन्धाः' इति कस्यामुपनिषदि पठ्यते ?
2) 'उपमर्दं च' इत्यत्र कस्य उपमर्दः प्रोक्तः ?
3) आश्रमकर्मणां विद्योत्पत्तौ अपेक्षा इत्यत्र श्रुतिप्रमाणं किम् ?
4) 'आत्मेति तूपगच्छन्ति ग्राहयन्ति' इत्यत्र किं वाक्यमुदाहृतम् ?
5) उपासनायां दिगादिनियमाः न वर्तन्ते, कारणं किम् ?
6) सहकार्यन्तरविध्यधिकरणस्य विषयवाक्यं किम् ?
7) उपासनं नाम किम् ?
8) कर्माङ्गोपासनाया उदाहरणं किम् ?
9) मनोधिकरणस्य सिद्धान्तः कः ?
10) 'स्मर्यते च' इत्यत्र किं स्मृतम् ?
11) विधुराधिकरणस्य सिद्धान्तः कः ?
12) ऐहिकाधिकरणस्य संशयः कः ?

**B) यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1) अनारब्धकार्ये एव तु पूर्वे तदवधेः।
2) अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्।
3) यदेव विद्ययेति हि।
4) ब्रह्मदृष्टिरुत्कर्षात्।
5) आवृत्तिरसकृदुपदेशात्।
6) नैकस्मिन् दर्शयतो हि।
7) तदाऽपीतेः संसारव्यपदेशात्।

**C) यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1) सर्वापेक्षाधिकरणम्।
2) सहकार्यन्तरविध्यधिकरणम्।
3) विधुराधिकरणम्।
4) पुरुषार्थाधिकरणम्।
5) आसीनाधिकरणम्।

**D) अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1) शारीरकमीमांसाभाष्यदिशा उपासनापदार्थं विमर्शयत।
2) श्रवणादीनां ज्ञानसाधनानाम् आवृत्त्यनावृत्तिविचारं सभाष्यं कुरुत।

***

## SK-141 भामती चतुःसूत्री

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1) प्रेक्षावत्प्रतिपित्सागोचरं किम् ?
2) “शास्त्रीये तु” इत्यत्र तु शब्दस्य कः अर्थ ?
3) आश्रमाध्यासमुदाहरत।
4) अवस्थाध्यासमुदाहरत।
5) विषयी कः ?
6) मिथ्याशब्दः किंवचनः ?
7) आगमः प्रत्यक्षस्य कीदृशं प्रामाण्यमुपहन्ति ?
8) मञ्चाः क्रोशन्ति इति कीदृशः प्रयोगः ?
9) सम्भेदशब्दार्थः कः ?
10) तात्पर्यनिर्णायकलिङ्गानि कानि ?
11) अभ्यासे अर्थभूयस्त्वे दृष्टान्तः कः ?
12) गौणः प्रत्ययः कः ?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1) मङ्गलश्लोकं व्याख्यात।
2) श्रुत्यादयो अनुभवादयश्च यथासम्भवमिह प्रमाणं, आशयं स्पष्टयत।
3) शास्त्रयोनित्वाधिकरणे प्रथमवर्णकार्थः कः?
4) वर्णाश्रमाद्यध्यासान् सोदाहरणं सप्रसंगं प्रतिपादयत।
5) आगमस्य अनुपचरितार्थत्वं साधयत।
6) सन्ति च सहस्राध्यासाः, किमर्थं तद्विना आत्मानात्माध्यासः विचारितः ?
7) गौणमुख्ययोः भेदं गमयत।

C) अत्र यथाच्छन्दं त्रयः समाधेयाः। 5x3=15

1) जन्माद्यधिकरणदिशा जगद्रूपं वर्णयत।

2) अख्यातिवादं विचारयत।

3) ब्रह्मप्रसिद्धमुताप्रसिद्धमिति यथाभाष्यं विचारयत।

4) समन्वयाधिकरणपूर्वपक्षं यथाभामती उपस्थापयत।

5) प्रमाणानामविद्याविषयत्वमालोचयत।

**D) अधस्ताद् अनुप्रियमेकं अनुबध्नीत।** **10x1=10**

1) अथशब्दार्थं विचारयत।

2) ब्रह्मणः शास्त्रयोनित्वमालोचयत।

***

**SK-161 वेदान्तसारः**

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशानाम् प्रश्नानां वाक्येन उत्तरं लिखत। 1x10=10**

1) पूरयत – “सतत्त्वतः... विवर्त इत्युदीरितः” ।

2) पूरयत – “सामानाधिकरण्यञ्च... -प्रत्यगात्मनाम्” ।

3) पञ्चीकृतानाम् आकाशादीनाम् आकाशादिशब्दैरेव व्यपदेशः केन न्यायेन ।

4) सविकल्पकसमाधेः किं लक्षणम् ।

5) अज्ञानस्य एकत्वे प्रमाणभूता श्रुतिः का ।

6) उदानः कः।

7) भाट्टमते आत्मा कः।

8) ज्ञानेन्द्रियाणाम् अधिष्ठातृदेवताः काः।

9) कषायाख्यविघ्नस्य किं लक्षणम् ।

10) के यमाः।

11) तात्पर्यलिङ्गेषु उपपत्तेः कोऽर्थः।

12) अनुभवमहावाक्यं किम्, तच्च कस्यामुपनिषदि वर्तते ।

**B) यथेष्टं पञ्च समाधत्त। 3x5=15**

1) “मनसैवानुद्रष्टव्यम्”, “यन्मनसा न मनुते” इत्यनयोः श्रुत्योरविरोधः कथम्।

2) अधिकारिलक्षणं यथाग्रन्थं सम्पूर्णं लिखत ।

3) अज्ञानस्य द्वे शक्ती के, तयोः कार्यञ्च किम् ।

4) व्युत्थानकाले जीवन्मुक्तः कीदृग् व्यवहरति।।

5) तत्त्म्पदयोरन्यतरत् पदं जहल्लक्षणया पदान्तरम् बोधयतु इति पक्षं निराकुरुत।

6) विश्ववैश्वानरयोः स्थूलविषयानुभवे विषयेन्द्रियदेवताविभागं दर्शयत ।

7) घटज्ञानं द्विविधव्याप्तिभ्यां व्याख्यात।

**C) यथाभिरुचि त्रीणि विशदयत। 5x3=15**

1) निर्विकल्पकसमाधेः विघ्नाः के ।

2) समाधेः सविकल्पकनिर्विकल्पकभेदम् प्रतिपादयत ।

3) विवर्तवादमुखेन ब्रह्मणि प्रपञ्चस्यापवादम् प्रदर्शयत ।

4) श्रवणं व्याख्यात ।

5) षड्विधतात्पर्यलिङ्गानि सदृष्टान्तं दर्शयत।

**D) एकं व्याख्यात। 10x1=10**

1) विशेषाध्यारोपाः तेषां खण्डनञ्च ।

2) सोऽयं देवदत्त इति वाक्यं दृष्टान्तीकृत्य उपदेशमहावाक्यस्थं सम्बन्धत्रयं शदयत ।

***

## SK-163 वेदान्तपरिभाषा (उपमानखण्डान्ता)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1) ज्ञानगतप्रत्यक्षप्रयोजकं किम् ?
2) ईश्वरसाक्षी कः ?
3) वाक्यार्थज्ञानविषयत्वे किं तन्त्रम् ?
4) इदं प्रत्यक्षयोग्यम्, इदमयोग्यम्, इत्यत्र किं प्रमाणम्।
5) वेदान्तनये परार्थानुमाने कति अवयवाः स्वीकृताः।
6) जगतः परिणाम्युपादानं किम् ?
7) ब्रह्म कीदृशं जगदुपादानम् ?
8) सदेव सोम्येदमग्र आसीत् इति वचनं कुत्रास्ति।
9) जीवो नाम कः ?
10) मायायाः एकत्वे का श्रुतिः।
11) ईश्वरलक्षणं लिखत।
12) उपाधिः कः ?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1) कार्यविनाशद्वैविध्यमुपस्थापयत।
2) मनो बुद्धिरहंकार... स्मरणं विषया इमे इति कारिकां विलिख्य सप्रसङ्गं व्याख्यां कुरुत।
3) मनसः सावयवत्वम् उपस्थापयत।
4) व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावग्रहणपुरःस्सरं त्रैकालिकनिषेधज्ञानं साधयत।
5) इन्द्रियजन्यमजन्यञ्च प्रत्यक्षम् इति व्यख्यात।
6) स्वप्नोपलब्धरथादीनां कुतो प्रातिभासिकत्वमिति विषयं विवेचयत।
7) जीवसाक्षिणः स्वरूपं विषदयत।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1) प्रातिभासिकरजतोत्पत्तिप्रकारं वर्णयत।

2) अनुमानत्रैविध्यं निराकुरुत।

3) सर्वेषामेव भावानां स्वाश्रयत्वेन सम्मते ।

प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता।। कारिकां व्याख्यात।

4) ज्ञानगतप्रत्यक्षप्रयोजकविचारमुपस्थापयत।

5) उपमानं मानान्तरमिति उपस्थापयत।

**D) अधस्ताद् अनुप्रियमेकं अनुबध्नीत।** **10x1=10**

1) साक्षिद्वैविध्यमालोचयत।

2) प्रमालक्षणमव्याप्त्यादिदोषवारणपुरःस्सरं व्याख्यात।

***

# SK-173 अद्वैतसिद्धौ जडत्वहेतुविचारात् अविद्यालक्षणविचारं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1) ज्ञानवदिच्छायाः निर्विषयत्वं कुतो न?
2) पूर्वपक्षानुसारेण ज्ञातृज्ञेयनिरूप्यत्वं कस्य स्वभावः?
3) यदा ऐन्द्रियकं ज्ञानं तदा अर्थः इति व्याप्तिः सिद्धान्त्यभिमता न वा?
4) आनन्दबोधानुमाने विभक्तशब्देन कीदृशः परिच्छेदः उक्तः?
5) अतोऽन्यदार्तम् इति श्रुत्या कस्य विनाशित्वं प्रतिपाद्यते?
6) कालः केषां मते प्रत्यक्षः?
7) "स्वभावतो योग्यस्य हि........।"(पूरयत)
8) ब्रह्मणः चतुर्विधपरिमाणनिषेधश्रुतिः का?
9) तात्पर्यलिङ्गानि कानि?
10) श्रुतीनां प्रामाण्यं कीदृशम्?
11) अतिदेशः नाम कः?
12) पञ्चदशरात्रे का सुब्रह्मण्या भवति?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1) सज्ञेयत्वम् किमिति विवेचयत।
2) नापि तृतीयः आत्मत्वस्यैव निरूपयितुमशक्यत्वात्।
3) अनात्मत्वमपि हेतुरिति सिद्धान्तयत।
4) अन्यथा सत्यं ज्ञानम् इत्यधिष्ठानानुवेध एव स्यात्।
5) परिच्छिन्नत्वं निरूपयत।
6) पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्।
7) अज्ञानत्वम् नाम किमिति व्याख्यात।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) तात्पर्यनिर्णायकलिङ्गानि परिचाययत।

2) देशतः परिच्छिन्नत्वपक्षे पूर्वपक्षमुपस्थाप्य निरस्यत।

3) अज्ञानत्त्वं वा जडत्वमिति पक्षमुपस्थापयत।

4) तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकम्।
   पूर्वस्य बाधकं नायं सर्प इत्याप्तवाक्यवत्।। व्यााख्यात।

5) प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्। प्रतिपादयत।

**D) अधस्ताद् अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) जडत्वहेतुं विचारयत।

2) जात्युपक्रमादिन्यायैः प्रत्यक्षं प्रबलमित्यंशं यथाग्रन्थं खण्डयत।

***

RKMVERI/DSS/MAIS/14-19/J2019/SK-176

## SK-176 तत्त्वप्रदीपिकायां मिथ्यात्वानुमाने हेतुदोषनिरासपर्यन्तम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) कीदृशो हरिर्मङ्गलाचरणे स्तुतः?
2) स्वप्रकाशत्वस्य चतुर्थे लक्षणविकल्पे को दोषः?
3) स्वप्रकाशत्वस्य षष्ठः लक्षणविकल्पः कः?
4) “आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः” कस्योक्तिरियम्?
5) "यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्" कुत्र प्रोक्तम्?
6) चित्सुखाचार्यस्य गुरुः कः?
7) पूर्वपक्षानुसारं प्रपञ्चसत्यत्वे श्रुतिप्रमाणं किम्?
8) मिथ्यात्वलक्षणविकल्पेषु न नवमः युक्तः, कुतः?
9) मिथ्यात्वस्य प्रत्यक्षसिद्धत्वे को दोषः?
10) सिद्धान्तमते मिथ्यात्वलक्षणं किम्?
11) अनन्तपदस्य किंपरत्वं पूर्वपक्षिभिरभिप्रेतम्?
12) मिथ्यात्वलक्षणविकल्पेषु चतुर्थः कः?

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) "अक्षमा भवतः केयं साधकत्वप्रकल्पने"।
2) "न च योगिप्रत्यक्षगम्यतया अपरोक्षत्वं धर्मादीनाम्"।
3) सजातीयप्रकाशाप्रकाश्यत्वम्, तत्खण्डनं च।
4) स्वप्रकाशत्वसाधकं केवलव्यतिरेक्यनुमानम्।
5) "सर्वेषामपि भावानामाश्रयत्वेन सम्मते"।
6) "अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः"।
7) अविद्यातत्कार्ययोरन्यतरत्वं वा मिथ्यात्वम्।

**C) पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) चिदात्मनः स्वप्रकाशत्वसाधकमनुमानम्।
2) स्वव्यवहारहेतुप्रकाशत्वं स्वप्रकाशत्वमित्यत्र पूर्वोत्तरपक्षः।
3) स्वप्रकाशत्वलक्षणे सिद्धान्तपक्षः।
4) सिद्धान्तसम्मतं मिथ्यात्वलक्षणम्।
5) मिथ्यात्वे नापि आगमः प्रमाणम्।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) चित्सुखाचार्यस्य देशकालकृतिपरिचयं कुरुत।
2) मिथ्यात्वस्य लक्षणं सपूर्वपक्षमालोचयत।

***

RKMVERI/DSS/MAIS/17-22/J2019/SK-213

## SK-213 सिद्धान्तकौमुद्यां समासप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) यथाशक्ति इत्यस्य लौकिकविग्रहः कः?
2) मुहूर्तसुखम् इत्यस्य लौकिकविग्रहः कः?
3) समृद्धिः इत्यस्य कः अर्थः?
4) आमुक्ति संसारः इत्यत्र केन सूत्रेण समासः?
5) राजदन्तः इत्यस्य लौकिकविग्रहः कः?
6) प्रपर्णः इत्यस्य लौकिकविग्रहः कः?
7) महावैयाकरणः इत्यत्र केन सूत्रेण समासः?
8) कतरकठः इत्यत्र केन सूत्रेण समासः?
9) स्वपदलौकिकविग्रहः कस्य समासस्य?
10) खट्वा क्षेपे इति सूत्रस्य किमुदाहरणम्?
11) द्वियमुनम् इत्यत्र कः समासः?
12) श्रेणीकृताः इत्यस्य लौकिकविग्रहः कः?

**B) अधोलिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15**

1) चोरभयम् इति प्रयोगस्य सिद्धिप्रक्रियां वर्णयत।
2) अनुरूपम् इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।
3) सप्तगङ्गम् इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।
4) तापसपर्वतौ इति प्रयोगस्य सिद्धिप्रक्रियां वर्णयत।
5) अन्नबुभुक्षुः इति प्रयोगस्य सिद्धिप्रक्रियां वर्णयत।
6) राजपुरुषः इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।
7) सुकेशीभार्यः इति प्रयोगं ससूत्रं साधयत।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) तृजकाभ्यां कर्तरि इति सूत्रं सोदाहरणं व्याख्यात।
2) विशेषणं विशेष्येण बहुलम् इति सूत्रं व्याख्यात।
3) नाव्ययीभावादतोम्त्वपञ्चम्याः इति सूत्रं सोदाहरणं प्रतिपादयत।
4) चार्थे द्वन्द्वः इति सूत्रस्य व्याख्या कार्या।
5) तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः इति सूत्रं यथाग्रन्थं व्याख्यात।

**D) निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) कर्तृकरणे कृता बहुलम् इति सूत्रस्य यथाग्रन्थं व्याख्यां कुरुत।
2) तद्धितार्थोत्तरपदसमाहारे च इति सूत्रं सोदाहरणं व्याख्यात।

***

# SK-216 सिद्धान्तकौमुद्याम् तद्धितप्रकरणे अपत्याधिकारात् प्राग्वहतीयं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

## A) नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10

1) सामर्थ्यं नाम किम्।
2) अणो द्व्यचः इति सूत्रेण विधीयमानः फिञ्प्रत्ययः कस्य अपवादभूतः।
3) गोत्रसंज्ञाविधायकं सूत्रं किम्।
4) राजन्यः इत्यत्र केन सूत्रेण प्रकृतिभावः विधीयते।
5) मनुष्यः इत्यत्र कः आगमः कः प्रत्ययश्च।
6) वास्त्रो रथः इत्यत्र कस्मिन्नर्थे कः प्रत्ययः।
7) बाकम् इत्यस्य विग्रहः कः।
8) ऋतव्यमित्यत्र केन सूत्रेण कः प्रत्ययः।
9) सान्धिवेलम् इत्यत्र कः विग्रहः।
10) कण्ठ्यम् इत्यत्र केन सूत्रेण कः प्रत्ययः।
11) आश्मः इत्यत्र टिलोपः कथम्।
12) नास्तिकः इत्यस्य विग्रहः कः।

## B) अधो लिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15

1) दाक्षिः इति रूपं साधयत।
2) रघूणामन्वयं वक्षे..... इति पङ्क्तिं व्याख्यात।
3) भैक्षमिति रूपं साधयत।
4) इञश्च इति सूत्रं व्याख्यात।
5) एङ् प्राचां देशे इति सूत्रं व्याख्यात।
6) सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् इति सूत्रं व्याख्यात।
7) गोमयम् इति रूपं साधयत।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1) वान्यस्मिन्सपिण्डे स्थविरतरे जीवति इति सूत्रं व्याख्यात।
2) पितृव्यमातुलमातामहपितामहाः इत्यस्मिन् सूत्रे स्थितानि वार्तिकानि व्याख्यात।
3) पाणिनिः इति रूपं साधयत।
4) सोऽभिजनोऽस्य इति अर्थे विद्यमानानि सूत्राणि वर्णयत।
5) तेन जीवतीति अर्थे विद्यमानानि सूत्राणि वर्णयत।

**D) निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1) समर्थानां प्रथमाद्वा इति सूत्रं व्याख्यात।
2) ठगधिकारप्रकरणे संस्कृतम्, चरति, तरति च इत्यस्मिन् अर्थे विद्यमानानि सूत्राणि वर्णयत।

***

# SK-218 सिद्धान्तकौमुद्यां तद्धितप्रकरणे प्राग्घितीयात् द्विरुक्तं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) वातूलः इत्यत्र ऊङ् केन?
2) चक्रीवान् चक्रवान् - को भेदः?
3) कौल्माषी शब्दस्य कः अर्थः?
4) सस्यकः शब्दस्य अर्थः कः?
5) एतावान् शब्दस्य कोऽर्थः?
6) अद्यश्वीना वडवा इत्यस्य कोऽर्थः?
7) आग्निपदम् इत्यत्र कः प्रत्ययः?
8) पारायणिकः शब्दस्य कः अर्थः?
9) आचार्यभोगीनः इत्यत्र णत्वं कथं न?
10) तृतीयः इत्यत्र पुरणार्थकः प्रत्ययः केन विधीयते?
11) इह इत्यत्र इदं प्रातिपदिकात् कः प्रत्ययः केन सूत्रेण?
12) धुर्यः किञ्च धौरेयः इति रूपद्वये कौ प्रत्ययौ विहितौ केन सूत्रेण?

**B) अधो लिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15**

1) एकादशमिति रूपं साधयत।
2) कियन्तः इति रूपं साधयत।
3) होत्राभ्यश्छः इति सूत्रं व्याख्यात।
4) शून्यम्, शुन्यम् - रूपद्वयं साधयत।
5) तेन यथाकथाचहस्ताभ्यां णयतौ इति सूत्रम् व्याख्यात।
6) लोमादिपामादिपिच्छादिभ्यः शनेलचः इति सूत्रं व्याख्यात।
7) श्राद्धं भुक्तम् अनेन इत्यस्मिन् विग्रहवाक्ये रूपाणि साधय।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1) नित्यवीप्सयोः - सूत्रं व्याख्यात।
2) फेनादिलच्च - सूत्रं व्याख्यात।
3) कालप्रयोजनाद्रोगे - सूत्रं व्याख्यात।
4) तेन तुल्यं क्रिया चेद्वतिः - व्याख्यात।
5) प्रमाणे द्वयसज्दघ्नञ्मात्रचः इति सूत्रम् व्याख्यात।

**D) निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1) आयुधजीविसङ्घाञ्ज्यड् बाहीकेष्वब्राह्मणराजन्यात् इति सूत्रं व्याख्यात।
2) तत्र साधु इत्यर्थे विहितानि सूत्राणि व्याख्यात।

***

RKMVERI/DSS/MAIS/16-21/J2019/SK-221

**SK-221 सिद्धान्तकौमुद्यां तिङन्ते भ्वादिप्रकरणम्**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) एधामासेत्यत्र अस्तेर्भूभावः कुतः न ?
2) इट ईटि इति सूत्रेण किं विधीयते ?
3) परस्मैपदसंज्ञाविधायकं सूत्रं किम् ?
4) 'गोपाय' इत्यस्य धातुसंज्ञा केन सूत्रेण ?
5) केभ्यः कर्तरि चङ् भवति ?
6) दयायासश्च इति सूत्रेण किं विधीयते ?
7) कमिधातोः कः सनादिप्रत्ययः ?
8) कृञ्प्रत्याहारे के धातवः सन्ति ?
9) पलायते अत्र लत्वं केन सूत्रेण ?
10) दीधीवेवीटाम् इति सूत्रस्यार्थः कः ?
11) गुप्धातोः कस्मिन्नर्थे सन् ?
12) ऊर्दते इत्यत्र केन सूत्रेण दीर्घः ?

**B) सप्तसु पञ्च प्रयोगान् ससूत्रं साधयत। 3x5=15**

1) गोपायाम्बभूव।
2) असेधीत्।
3) जुगुपतुः।
4) क्रामति।
5) धिन्वन्ति।
6) जगाम।
7) पचते।

**C) पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रं वर्णयत।
2) इणः षीध्वंलुङ्लिटां धोऽङ्गात् इति सूत्रं व्याख्यात।
3) तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् इति सूत्रं प्रतिपादयत।
4) यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रं व्याख्यात।
5) अचस्तास्वत्थल्यनिटो नित्यम् इति सूत्रं सोदाहरणं व्याख्यात।

**D) द्वयोरेकं समाधत्त** **10x1=10**

1) पुरुषव्यवस्थापकानि सूत्राणि यथाग्रन्थं वर्णयत।
2) द्विर्वचनेऽचि इति सूत्रं सपदकृत्यं प्रतिपादयन्तु।

***

## SK-228 वैयाकरणसिद्धान्तकौमुद्याम् उत्तरकृदन्तप्रकरणम्।

**समयः - होराद्वयम्** **पूर्णाङ्काः - ५०**

---

**A) यथेच्छं दश प्रश्नाः समाधेयाः।** **१ x १० = १०**

1) संयावः कः?
2) निकारो नाम किम्?
3) क्रमश्च क्त्वि इति सूत्रार्थं लिखत।
4) उदङ्कोऽनुदके इति सूत्रार्थः कः?
5) काण्डलावः इत्यत्र कः प्रत्ययः?
6) अजकनाशं नष्टः इत्यस्य कोऽर्थः?
7) प्रग्राहः इत्यत्र केन सूत्रेण घञ्?
8) अवग्राहः कः।
9) क्रौञ्चबन्धं बद्धः इत्यत्र केन सूत्रेण णमुल्?
10) ब्राह्मणवेदं भोजयति इत्यस्य कः आशयः?
11) स्वे पुषः इत्यत्र स्वम्पदेन कस्य ग्रहणम्?
12) पक्त्रिमम् इत्यस्य कोऽर्थः?

**B) यथाकामं पञ्च प्रश्नान् उत्तरत।** **३ x ५ = १५**

1) कर्मण्याक्रोशे कृञः खमुञ्।
2) उणादयो बहुलम्।
3) समानकर्तृकयोः पूर्वकाले।
4) परौ भुवोऽवज्ञाने।
5) अन्यथैवमित्यादिसूत्रं प्रपूर्य वर्णयत।
6) कथं मुखं व्यदाय स्वपिति नेत्रे निमील्य हसति इति?
7) निवासचितिशरीरोपसमाधानेष्वादेश्च कः इत्यस्य स्थले चः कः इति योगः कथन्न?

**C) स्वच्छन्दं त्रीन् समाधत्त।** **५ x ३ = १५**

1) निवासचिति ......।
2) तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्।
3) हिंसार्थानां च समानकर्मकाणाम्।
4) परिमाणाख्यायां सर्वेभ्यः।
5) गुरोश्च हलः।

**D) एकं प्रतिपादयत।** **१० x १ = १०**

1) णमुल्प्रत्ययं यथाग्रन्थं विवृणुत।
2) अङ्-प्रत्ययः।

***

**SK-223 सिद्धान्तकौमुद्याम् अदादितः णिजन्तप्रकरणम्**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशप्रश्नानाम् उत्तरं लिखत। 1x10=10**

1) अदुग्ध इत्यत्र क्सस्य लुक् केन ?
2) अभीयात् इत्यत्र ह्रस्वः कुतो न ?
3) इक् स्मरणे अयमपि नित्यमधिपूर्वः इत्यत्र किं मानम् ?
4) तिप्यनस्तेः इत्यनेन सूत्रेण किं विधीयते ?
5) ओहाङ्-धातोः लुङि तिपि किं रूपम् ?
6) दिवु धातोः कोऽर्थः ?
7) विभाषा चेः इत्यनेन सूत्रेत्र किं विधीयते ?
8) गिलति इत्यत्र लत्वं केन ?
9) कुर्वः इत्यत्र उकारस्य लोपः केन ?
10) अजीगणद् इत्यत्र अभ्यासस्य ईत्वं केन ?
11) हेतुमान् को भवति ?
12) वाजयति कस्मिन्नर्थे भवति ?

**B) काञ्चन पञ्चप्रश्नान् समाधत्त। 3x5=15**

1) ख्याधातोः सार्वधातुकमात्रविषयता इत्यत्र प्रमाणं किम् ?
2) एधि इति रूपं साधयत।
3) अचूचुरत् इति ण्यन्तं रूपं साधयत।
4) अश्लिषत् इति प्रयोगं साधयत।
5) जिघाय इति प्रयोगं साधयत।
6) ममार इति प्रयोगं साधयत।
7) कुर्वन्ति इति प्रयोगं साधयत।

**C) यथारुचि प्रश्नत्रयं समाधत्त। 5x3=15**

1) अस्यतिवक्तिख्यातिभ्योऽङ् इति सूत्रं सोदाहरणं व्याख्यात।

2) सुविनिर्दुभ्यः सुपिसूतिसमाः इति सूत्रं व्याख्याय पूर्वत्रासिद्धीयमद्विर्वचने इति सप्रसङ्गं निरूपयत।

3) भ्रस्जो रोपधयोरमन्यतरस्याम् इति सूत्रं यथाग्रन्थं व्याख्यात।

4) धूनोति चम्पकवनानि इति कारिकां व्याख्यात।

5) च्छ्वोः शूडनुनासिके च इति सूत्रं सोदाहरणं व्याख्यात।

**D) यथेष्टं अन्यतमं व्याख्यात।** **10x1=10**

1) आख्यानात्कृतस्तदाचष्टे कृल्लुक् इति वार्तिकं यथाग्रन्थं व्याख्यात

2) ओः पुयण्ज्यपरे इति सूत्रं सप्रसङ्गं व्याख्यात

***

## SK-225 सिद्धान्तकौमुद्यां सन्नन्तात् लकारार्थप्रकरणं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त।** **1x10=10**

3) धातोः कर्मणः इति सूत्रे धातुग्रहणं किमर्थम् ?

4) इको झलिति सूत्रस्य अर्थः कः ?

5) मुचोऽकर्मकस्य गुणो वा इत्यस्य उदाहरणं किम् ?

6) क्रियासमभिहारः नाम किम् ?

7) गत्यर्थकधातुभ्यः कस्मिन्नर्थे यङ् ?

8) सुपः आत्मनः क्यचित्यस्य कोऽर्थः ?

9) उपमानादाचारे इत्यनेन कस्मात् क्यच् विहितः ?

10) कृष्णति इत्यत्र कः प्रत्ययः ?

11) रोमन्थायते इत्यस्य विग्रहः कः ?

12) व्यतिलुनीते अत्र आत्मनेपदं केन सूत्रेण ?

13) गोपी कृष्णाय तिष्ठते इत्यस्य कोऽर्थः ?

14) कारकान्तराणि कदा कर्तृसंज्ञां लभन्ते ?

**B) सप्तसु पञ्च समाधत्त।** **3x5=15**

1. “अत एव सनि मीमा इति सूत्रे माधातोः पृथङ्गीग्रहणं कृतम्। कुतः?
2. भूतपूर्वादप्यनेकाचः आम्। कथम् ?
3. माणवकमनुक्रीडति। अत्र कुतः आत्मनेपदम् ?
4. ईप्सति। ससूत्रं रूपं साधयत।
5. बोभूयते। ससूत्रं रूपं साधयत।
6. बोभवीती। ससूत्रं रूपं साधयत।
7. चाकरीति। ससूत्रं रूपं साधयत।

**C) पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) हलन्ताच्च। सोदाहरणं विवृणुत।

2) शैषिकान्मतुबर्थीयादिति कारिकां व्याख्यात।

3) सुपः आत्मनः क्यच्। विवृणुत।

4) कर्मणः रोमन्थतपोभ्यां वर्तिचरोः। व्याख्यात।

5) आङो यमहनः। वर्णयत।

**D) द्वयोरेकं समाधत्त। 10x1=10**

1) धातोः कर्मणः समानकर्तृकादिच्छायां वा। सोदाहरणं विवृणुत।

2) भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। सोदाहरणं विवृणुत।

***

**SK-237 लघुसिद्धान्तकौमुद्याम् अजन्तस्त्रीतः स्त्रीप्रत्ययं यावत्।**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) अधः यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1) पुंयोगादाख्यायाम् इति सूत्रस्य वृत्तिं लिखत।
2) सर्विका इत्यत्र केन सूत्रेण इकारः भवति।
3) पचन्ती इत्यत्र कः स्त्रीप्रत्ययः, केन च विधीयते।
4) पिबध्यै इत्यस्य अव्ययसंज्ञा केन।
5) न लुमताङ्गस्य इति नित्यं वा अनित्यं वा।
6) इदुद्भ्याम् इति सूत्रार्थं लिखत।
7) चतुर्ण्णाम् इत्यत्र नुडागमविधायकं शास्त्रं किम्।
8) सम्प्रसारणाच्च इत्यनेन किं भवति।
9) वान्नावादयः कदा नित्यं भवति।
10) हो ढः इति सूत्रार्थं लिखत।
11) नौशब्दस्य रूपाणि कथं भवन्ति।
12) स्वस्नादयः के।

**B) यथारुचि अत्र पञ्च समाधत्त। 3x5=15**

1) इतो मनुष्यजातेः इति सूत्रं व्याख्यात।
2) ऊङुतः इति सूत्रं व्याख्यात।
3) हो ढः इति सूत्रं व्याख्यात।
4) फलानि इति रूपं साधयत।
5) अहमिति रूपं साधयत।
6) चतुर् सु इत्यत्र खरि परे विसर्गाभावं व्याख्यात।
7) औङ आपः इति सूत्रं व्याख्यात।

**C) निम्नलिखितेषु यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1) मत्यां, मतौ इति रूपद्वयं साधयत।
2) वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रं व्याख्यात।
3) एकाचो बशो भष् इत्यादिसूत्रं व्याख्यात।
4) स्वरादिगणपठितानां केषाञ्चन शब्दानां लौकिकशास्त्रीयोदाहरणपुरःसरं स्वरूपं वर्णयत।
5) अल्लोपोऽनः इति सूत्रं व्याख्यात।

**D) अधःप्रदत्तेषु अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1) स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रं व्याख्यात।
2) युष्मत्प्रक्रियायाम् अवधेयाः अंशाः।

***

## SK-237 लघुसिद्धान्तकौमुद्याम् अजन्तस्त्रीलिङ्गादारभ्य अव्ययप्रकरणं यावत् स्त्रीप्रत्ययश्च

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश समाधेयाः। 1x10=10**

1) याडागमविधायकं सूत्रं किम् ?
2) विकल्पेन नदीसंज्ञाविधायकं सूत्रं किम्।
3) स्वस्रादयः के ?
4) शि इत्यस्य का संज्ञा भवति ?
5) आदिश्यमानेषु ह्रस्वेषु एचः कः स्यात् ?
6) रात्री इत्यत्र केन कः स्त्रीप्रत्ययः ?
7) शूर्पणखा इत्यत्र णत्वं केन सूत्रेण ?
8) षट्संज्ञाविधायकं सूत्रं किम् ?
9) चतुर्षु इत्यत्र शरः द्वित्वं केन निषिध्यते ?
10) नोपधायाः इति सूत्रस्य अर्थं लिखत।
11) अपो भि इति सूत्रस्यार्थं लिखत।
12) कृन्मेजन्तः इत्यस्य अर्थं लिखत।

**B) यथाकामं पञ्च प्रश्नान् समाधत्त। 3x5=15**

1) तिस्रः इति रूपं साधयत।
2) दधनि इति रूपं साधयत।
3) षिद्गौरादिभ्यश्च इति सूत्रं व्याख्यात।
4) वोतो गुणवचनात् इति सूत्रं व्याख्यात।
5) राज्ञः इति रूपं साधयत।
6) युष्माकम् इति रूपं साधयत।
7) चत्वारि इति रूपं साधयत।

**C) यथाकामं त्रीन् प्रश्नान् उत्तरत।** **5x3= 15**

1) रमे इति रूपं साधयत।
2) वारिणि इति रूपं साधयत।
3) वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रं व्याख्यात।
4) ष्णान्ता षट् इति सूत्रं व्याख्यात।
5) लिट्त्सु इति रूपं साधयत।

**D) यथाकाममेकमुत्तरत।** **10x1=10**

1) टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रं व्याख्यात।
2) एकाचो बशो भष् झषन्तस्य स्ध्वोः इति सूत्रं व्याख्यात।

***

## SK-238 लघुसिद्धान्तकौमुद्यां तिङन्तप्रकरणम्

समयावधिः-होराद्वयम् पूर्णाङ्काः-५०

---

**A) दश समाधेयाः** १ x १० = १०

1) दिवादिभ्यः कर्त्रर्थे सार्वधातुके कः विकरणः भवति ?
2) अदः घस्लृ-आदेशः केषु लकारेषु भवति ?
3) अयुः इत्यत्र झेर्जुस् केन सूत्रेण ?
4) ईयतुः इत्यत्र कथं दीर्घः ?
5) शे तृम्फादीनां नुम् वाच्यः इत्यत्र आदिशब्दस्य कोऽर्थः ?
6) मस्जेः नुम् कुत्र भवति? कथम् ?
7) जघनिथ इत्यत्र हकारस्य घकारः केन सूत्रेण ?
8) उरत् इति सूत्रस्य कोऽर्थः ?
9) क्राम्यति इत्यत्र श्यन् केन सूत्रेण ?
10) असिचत् इति कस्मिन् लकारे रूपम् ?
11) विचति इत्यत्र कः धातुः ?
12) आ च हौ इति सूत्रस्य कोऽर्थः ?

**B) यथाभीष्टं त्रीणि समाधत्त** ३ x २ = ६

1) पुगन्तलघूपधस्य च इति व्याख्यात।
2) झशां जशः खयां चर इति विवेकः इति व्याख्यात।
3) स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा इति व्याख्यात।

**C) यथाभीष्टं त्रीणि रूपाणि साधयत** ३ x ३ = ९

1) भवेत्
2) गच्छति
3) तेने
4) सिषिधतुः

**D) यथाभीष्टम् त्रीणि रूपाणि साधयत** ३ x ५ = १५

1) आनर्च

2) जुगोपिथ

3) ममङ्क्थ

4) ईयतुः

5) विदाङ्करोतु

**E) यथाभीष्टम् एकं व्याख्यात** **१० x १=१०**

1) अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रं व्याख्यात।

2) आत्मनेपदविधानं वर्णयत।

***

## SK-238 लघुसिद्धान्तकौमुद्यां तिङन्तप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) अधोलिखितेषु दश समाधत्त। 1x10= 10**

1) सेर्ह्यपिच्च इति सूत्रेण हि इत्यादेशे तत्र एरुः इति कथं न प्रवर्तते ?
2) लोटो लङ्वत् इति सूत्रस्यार्थः कः ?
3) क्रियार्थायां क्रियायां सत्याम् असत्याञ्च लृट्लकारस्य उदाहरणं दीयताम्।
4) ह्रस्व इति सूत्रेण कस्य ह्रस्वः विधीयते ?
5) झोऽन्तः इति सूत्रेण किदृशस्य झस्य अन्तादेशः ?
6) अहं च त्वं च – अत्र गम्-धातोः प्रयोगं कुरुत।
7) अपृक्तस्य हलः ईडागमः केन सूत्रेण ?
8) आतिषुः इत्यत्र जुस् केन सूत्रेण ?
9) जगाद, जगद इति रूपद्वयं केन सूत्रेण ?
10) नेदुः इत्यत्र एत्वं केन सूत्रेण ?
11) नन्दति इत्यत्र धातुः कः ?
12) चकाट इत्यत्र धातुः कः ?

**B) यथाभीष्टं द्वयोः रूपाणि लिखत। 3x2= 6**

1) चिञ् चयने इति धातोः लिटि आत्मनेपदे।
2) षुञ् अभिषवे इति धातोः लुङि उभयपदे।
3) धूञ् कम्पने इति धातोः लटि उभयपदे।
4) हन हिंसागत्योः इति धातोः घस्लादेशे रूपाणि।

**C) यथाभीष्टं त्रयाणां सूत्राणाम् सोदाहरणं अर्थः लिख्यताम्। 3x3= 9**

1) तस्मान्नुड् द्विहलः।
2) स्वरतिसूतिसूयतिधूञूदितो वा।
3) सिचि वृद्धिः परस्मैपदेषु।
4) हनो वध लिङि।

5) उतो वृद्धिर्लुकि हलि।

**D) यथेप्सितं त्रीणि रूपाणि साध्यन्ताम्।** **5x3= 15**

1) जायेरन्

2) अशिष्यति

3) चिक्षाय

4) भवेयुः

5) भूयासुः

**E) द्वयोः एकं समाधत्त।** **10x1= 10**

1) अत एकहल्मध्येऽनादेशादेर्लिटि।

2) आर्धधातुकलकाराणां विषये विस्तृततया आलोच्यताम्।

***

## SK-243 महाभाष्ये 8, 9 आह्निके

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः यथेष्टं दशप्रश्नानाम् उत्तरं लिखत। 1x10=10**

1) केन लौकिकन्यायेन आदेशः स्थानिवद् भवति?
2) आदेशी इत्यस्य कोऽर्थः?
3) शतुरनुमो नद्यजा इत्यत्र यदि अनुम् इति प्रत्याहारः तर्हि लुनता-पुनता इत्यादौ कथं स्वरदोषस्य वारणम्?
4) अचः परस्मिन् सूत्रे विधिग्रहणस्य भाष्यसम्मतप्रयोजनं किम्?
5) आरभ्यमाणे नित्यासौ... सिद्ध्यति। इति श्लोकवार्तिकं पूर्यत।
6) स्वरदीर्घयलोपविधिषु को न स्थानिवत्?
7) न पदान्तसूत्रे विधिशब्दस्य कर्मसाधनपक्षे क्व दोषः?
8) पूर्वत्रासिद्धे न स्थानिवदिति स्वीकारे न पदान्तसूत्रे केषां पाठः त्यक्तुं शक्यः?
9) द्विर्वचनेऽचीत्यत्र कति पक्षाः भाष्ये उक्ताः?
10) जग्ले, मग्ले इत्यत्र कथं दोषनिवारणम्?
11) लुक्श्लुलुपः इत्यत्र प्रत्ययग्रहणं किमर्थम्?
12) कदा तपरस्तत्कालस्य सूत्रं नियमार्थं स्याद्?

**B) अधः काश्चन पञ्चप्रश्नान् समाधत्त। 3x5=15**

1) अयचः प्रत्ययान्तरत्वे के दोषाः कथञ्च परिहाराः ?
2) स्थानिवत्सूत्रे आदेशग्रहणं किमर्थम् ?
3) एकदेशविकृतस्यानन्यत्वात्सिद्धम् इति वार्तिकं वर्णयत।
4) अचः परस्मिन् सूत्रे परस्मिन्निति किमर्थम् ?
5) विधिशब्दशस्य कर्मसाधनत्वं वर्णयत।
6) अदर्शनं लोप इति सूत्रे प्रत्ययलक्षणप्रतिषेधं वर्णयत।
7) द्रुतायां तपरकरणे मध्यमविलम्बितयोः ग्रहणं कथम् ?

**C) अधस्ताद् यथारुचि प्रश्नत्रयं समाधत्त।** **5x3=15**

1) स्थानिवद्भावार्थं सूत्रमनपेक्षितमिति यथाग्रन्थं निरूपयत।
2) तस्य दोषः संयोगादिलोपलत्वणत्वेषु इति वार्तिकं व्याख्यात।
3) अपरविधाविति तु वक्तव्यम् इति वार्तिकं व्याख्यात।
4) अदर्शनं लोपः इति सूत्रं व्याख्यात।
5) अचः पूर्वविज्ञानादैचोः सिद्धम् इत्यस्य आशयं लिखत।

**D) नीचैः प्रदत्तयोः यथेष्टम् अन्यतमं व्याख्यात।** **10x1=10**

1) प्रत्ययलोपे प्रत्ययलक्षणम् इति प्रत्ययद्वयग्रहणं विचार्य, लुक्युपसंख्यानमिति वार्तिकं व्याख्यात।
2) द्विर्वचनेऽचि सूत्रस्य पञ्चपक्षान् यथाभाष्यं निरूपयत।

***

# SK-251 परमलघुमञ्जूषा

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

**A) द्वादशसु दश समाधत्त।** **1x10=10**

1) शाब्दबोधस्य कार्यकारणभावः कः ?
2) नागेशमते का शक्तिः ?
3) अपभ्रंशेष्वपि शक्तेस्तुल्यत्वं कथम् ?
4) लक्षणाबीजं किम् ?
5) वाचः चत्वारः भेदाः के ?
6) किं नाम तात्पर्यम् ?
7) नागेशरीत्या सकर्मकत्वं किम् ?
8) कःधातुः कर्मस्थभावकः ?
9) पर्युदासद्योत्यः कः ?
10) वर्त्तमानकालत्वं किम् ?
11) नैय्यायिकसम्मतं लक्षणालक्षणं किम् ?
12) नैय्यायिकमते शाब्दबोधसहकारिकारणानि कानि ?

**B) सप्तसु पञ्च समाधत्त।** **3x5=15**

1) स्फोटस्य भेदाः के ?
2) बौद्धार्थसत्वे किं मानम् ?
3) नागेशोक्तसकर्मकलक्षणं विवृणुत।
4) अवधारणं कति विधम् ? वर्णयत।
5) कथं चिरनष्टे नश्यतीति प्रतीतिः नास्ति ?
6) लक्षणायाः रुढिप्रयोजनवती सोदाहरणं निरूपयत।
7) योग्यतायाः शाब्दबोधसहकारिकारणत्वमस्ति नवेति विचारयत।

**C) पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) नैय्यायिकोक्तशक्तिलक्षणखण्डनं विवृणुत।
2) शक्तेश्चातुर्विध्यं सोदाहरणं वर्णयत।
3) पदप्रत्यक्षविषये नैय्यायिकमतं खण्डयत।
4) जानातेः फलं किम् पूर्वपक्षनिरसनपूर्वकं प्रतिपादयत।
5) नञः पर्युदासार्थत्वं वर्णयत।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) शक्तिविषये नैय्यायिकमतखण्डनपुरस्सरं वैय्याकरणमतं प्रतिपादयत।
2) लक्षणां सभेदं निरूप्य खण्डयत।

# SK-257 परिभाषेन्दुशेखरे द्वितीयः भागः

समयावधिः-होराद्वयम् पूर्णाङ्काः-५०

---

**A) दश समाधेयाः** **१ x १० = १०**

1) प्रातिपदिकग्रहणे इति परिभाषायाः ज्ञापकं किम् ?
2) भृशादिभ्यो भुव्यच्वेः इत्यनेन विधीयमानः क्यङ् क्व दिवा भृशा भवन्ति इत्यत्र कथं न प्रवर्तते ?
3) बहुव्रीहौ अतद्गुणसंविज्ञानस्य ग्रहणं भवति उत न ?
4) स्वरविधौ इत्यस्य कोऽर्थः ?
5) सन्निपातशब्देन कीदृशः सम्बन्धः गृह्यते ?
6) नमस्करोति देवान् इत्यत्र कथं न चतुर्थी ?
7) प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः इति परिभाषा भाष्ये कुत्र स्पष्टीकृता ?
8) क्वचित्समुदायेऽपि इति परिभाषायाः लौकिकदृष्टान्तः कः ?
9) नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इत्यस्य कोऽर्थः ?
10) वार्णादाङ्गं बलीयः इति परिभाषायाः ज्ञापकं किम् ?
11) क्वचिदपवादविषये इति परिभाषायाम् अपवादो नाम कः ?
12) अनन्तरस्य विधिर्वा इति परिभाषा किम्मूलिका ?

**B) यथाभीष्टं पञ्च व्याख्यात** **३ x ५ = १५**

1) पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्।
2) नञ्घटितमनित्यम्।
3) ताच्छीलिकेषु वासरूपविधिर्नास्ति।
4) प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम्।
5) तदनुबन्धकग्रहणे नातदनुबन्धकस्य।
6) सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्।
7) अङ्गवृत्ते पुनर्वृत्तावविधिः।

**C) यथाभीष्टं त्रीणि व्याख्यात** **५ x ३ =१५**

1) सन्निपातपरिभाषाया अनित्यतां प्रतिपादयत।

2) क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति इति परिभाषां व्याख्यात।

3) विधौ परिभाषोपतिष्ठते नानुवादे इति परिभाषां व्याख्यात।

4) साम्प्रतिकाभावे भूतपूर्वगतिः इति परिभाषां व्याख्यात।

5) हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् इति परिभाषां व्याख्यात।

**D) यथाभीष्टम् एकं व्याख्यात** **१० x १=१०**

1) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्

2) स्वरविधौ व्यञ्जनमविद्यमानवत् इति परिभाषां व्याख्यात।

***

## SK-266 लघुशब्देन्दुशेखरे अजन्तप्रकरणम्

कालावधिः - होराद्वयम्                                                                                    पूर्णाङ्काः - 50

---

**A) यथेष्टं दशप्रश्नानाम् उत्तरं लिखत।                                                            1x10=10**

1) किं नाम प्रत्ययत्वम् ?
2) एकशब्दस्य के अर्थाः ?
3) तस्माच्छसो नः पुंसि इत्यत्र पुंसीति किमर्थम् ?
4) आङि चापः इति सूत्रे चकारेण कस्य परामर्शः ?
5) हे लक्ष्मि इत्यादौ कथं लोपसिद्धिः ?
6) अपदं न प्रयुञ्जीत इत्यत्र अपदमित्यस्य कोऽर्थः ?
7) स्थानिवत्सूत्रेण सिद्धे प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रं किमर्थम् ?
8) नागेशमते अनुबन्धत्वं नाम किम् ?
9) रमा इत्यस्य कः लौकिकविग्रहः ?
10) लशक्वतद्धिते इत्यत्र अतद्धिते इति पदं किमर्थम् ?
11) गुणः कृतात्मसंस्कार इति न्यायं सम्पूर्णं लिखत।
12) अतोऽम् इत्यस्य अतो म् इति च्छेदे ज्ञानमित्यादौ को दोषः ?

**B) काञ्चन पञ्चप्रश्नान् समाधत्त।                                                                    3x5=15**

1) तस्माच्छसो इति सूत्रं व्याख्यात।
2) अङ्गसंज्ञासूत्रे प्रत्यय इत्यस्य प्रयोजनं लिखत।
3) जश्शसोः शिःइति सूत्रस्य व्याख्या कार्या।।
4) ङसिङ्योः स्मात्स्मिनौ इति सूत्रस्य व्याख्या कार्या।
5) लशक्वतद्धिते इत्यस्याशयः प्रस्तूयताम्।
6) एङ्ह्रस्वात्सम्बुद्धेः इति सूत्रे एङ्ग्रहणं किमर्थम्।
7) परे तु अनुबन्धत्वयोग्यतयाऽत्रापि तन्निषेधप्रवृत्या शित्वादेव सर्वादेशः इति ग्रन्थस्य तात्पर्यं लिखन्तु।

**C) यथारुचि प्रश्नत्रयं समाधत्त।** **5x3=15**

1) अतोऽम् इति सूत्रस्य यथाग्रन्थं विस्तरेण व्यख्यां कुरुत।

2) ङेर्य इति सूत्रस्य व्याख्यां कुरुत।

3) टाङसिङसामिनात्स्याः इति शास्त्रस्य यथाग्रन्थं व्याख्यां कुरुत।

4) अट्कुप्वाङ् इति सूत्रस्य व्याख्या कार्या।

5) पद्दन्नोमास् इत्यत्र प्रकृत्यन्तराण्येव इति यथाग्रन्थं व्याख्यात।

**D) यथेष्टं अन्यतमं व्याख्यात।** **10x1=10**

1) नामि इति सूत्रं व्याख्यात।

2) जराय जरस् इति यथाग्रन्थं निरूपयत।

***

RKMVERI/DSS/MAIS/14-19/J2019/SK-268

# SK-268 लघुशब्देन्दुशेखरे स्त्रीप्रत्ययप्रकरणम् अव्ययीभावसमासश्च

कालावधिः - होराद्वयम् सत्रम् - 10 पूर्णाङ्काः - 50

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) शर्वरी इत्यत्र केन सूत्रेण कः कृत्प्रत्ययः ?
2) लिङ्गानां लौकिकं लक्षणं लिखन्तु ?
3) मामका इत्यस्य कः विग्रहः ?
4) डाबुभाभ्यामन्यतरस्याम् इति सूत्रे अन्यतरस्यां ग्रहणं किमर्थम् ?
5) सन्निपातपरिभाषायाः अनित्यत्वे किं प्रमाणम् ?
6) समासान्ताः इत्यत्र समासपदं किं परम् ?
7) स्त्रीप्रत्ययविधायकसूत्रेषु तदन्तविधौ किं प्रमाणम् ?
8) विस्पष्टपटुः इत्यत्र कः समासः ?
9) स्वाङ्गग्रहणेन स्वाङ्गसमुदायस्य ग्रहणं भवति नवेति ?
10) कति वयांसि।
11) सुपो धातुप्रातिपदिकयोः इत्यस्य स्थाने अङ्गस्य सुपः इति कुतो नोक्तम् ?
12) सौपर्णेयी इत्यत्र कः स्त्रीप्रत्ययः ?

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) बहुव्रीहौ वेति वार्तिकस्य व्याख्या कार्या।
2) परिभाषेयम्। सा च पदविधिरिति सूत्रस्वरसात् इत्यस्य तात्पर्यं लिखन्तु।
3) मामकनरकयोरुपसंख्यानम् इत्यस्य सोदाहरणं व्याख्या कार्या।
4) मनः इति सूत्रस्य व्याख्या कार्या।
5) पञ्च इत्यत्र कथं न टाप् इति यथाग्रन्थं लिखन्तु।
6) यूनस्तिः इति सूत्रस्य व्याख्या कार्या।
7) सौपर्णेयी आक्षिकी, इत्यनयोः सिद्धिः कार्या।

**C) पञ्चसु त्रीन् समाधत्त। 5x3=15**

1) सर्वत्र लोहितादिकतन्तेभ्यः इति सूत्रं व्याख्यात।
2) नाव्ययीभावादतोऽम्त्वपञ्चम्याः इति सूत्रस्य व्याख्यां कुरुत।

3) क्रीतात्करणपूर्वात् इति सूत्रस्य व्याख्या कार्या।

4) डाबुभाभ्यामन्यतरस्याम् इति सूत्रस्य व्याख्या कार्या।

5) पुरुषात्प्रमाणेऽन्यतरस्याम् इति सूत्रस्य व्याख्या कार्या।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) प्रथमानिर्दिष्टं समास उपसर्जनम् इति सूत्रस्य यथाग्रन्थं व्याख्यां लिखत।

2) स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रं यथाग्रन्थं वर्णयन्तु।

***

RKMVERI/DSS/MAIS/15-20/J2019/SK-271

**SK-271 वैय्याकरणभूषणसारः (आदितः नामार्थप्रकरणं यावत्)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) केषां वचः कौण्डभट्टः दूषयति ?

2) व्यापारः कः ?

3) फले आश्रयान्वयं के बोधयन्ति ?

4) कृञः कर्मकर्तरि प्रयोगः कुतः उपपन्नः ?

5) कः अकर्मकः धातुः ?

6) असमस्तनञ् इत्यनेन कः ग्राह्यः ?

7) परोक्षत्वं नाम किम् ?

8) वह्निश्चेत् प्राज्वलिष्यद् ओदनमपक्ष्यद् इति वाक्यस्य शाब्दबोधं लिखत ?

9) लिङ्लकारेण के अर्थाः द्योत्यन्ते ?

10) अधीष्टः कः ?

11) किं नाम विकार्यम् ?

12) अपादानस्य कति भेदाः ?

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1. व्यापारः कः ?
2. कालस्य कुत्रान्वयः ?
3. मीमांसकानां मते भावना प्रत्ययवाच्या इत्यत्र प्रथमयुक्तिः का ?
4. भूवादयो धातवः इति सूत्रस्यार्थः कथमिति प्रतिपादयत।
5. सम्बोधनान्तस्य कुतः क्रियायामेवान्वयः ?
6. व्यातेने किरणावलीमुदयनः इति वाक्यं कुतः असाधु ?
7. स्वातन्त्र्यं नाम किम् ? निरूपयत।

**C) पञ्चसु त्रीन् समाधत्त। 5x3=15**

1) व्यापारस्वरूपं कीदृशम्।

2) भावनायाः धात्ववाच्यत्वे के दोषाः भवन्ति ?

3) प्रकृतिप्रत्यययोः प्रत्ययार्थः प्रधानमित्यस्य वास्तविकार्थः कः ?

4) लृङर्थः कः। निरूपयत।

5) सम्प्रदानं विवृणुत।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) सम्बोधनान्तमित्यादिकारिकाद्वयं व्याख्यात।

2) टिल्लकाराणामर्थान् यथाग्रन्थं वर्णयत।

***

## SK-301 निरुक्तं सूक्तानि च

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

**A) एकेन वाक्येन पदेन वा उत्तरत। 1x10=10**

1) ब्रह्मा कुतः परिवृढः।
2) समाम्नायः समाम्नातः इत्यत्र समाम्नायपदार्थः कः।
3) भावो नाम कः।
4) बालाः किं प्रयोजनकाः।
5) बिल्मग्रहणं नाम कोऽर्थः।
6) साक्षात्कृतधर्माणः के।
7) वचनम् इन्द्रियनित्यम् इति कस्य मतम्।
8) के निपाताः।
9) सीमापदनिर्वचनं कथम्।
10) अद्भूतं नाम किम्।
11) षड् भावाविकाराः इति कस्य मतम्।
12) निघण्टवः के।

**B) अभीष्टान् पञ्च समासेन विवृणुत। 3x5=15**

1) "इन्द्रस्य नु वीर्याणि प्रवोचं..." इति मन्त्रं व्याख्यात।
2) "अहं रुद्रेभिर्वसुभि..." इति मन्त्रं विशदयत।
3) "एतावानस्य महिमातो..." इति मन्त्रं सप्रसङ्गं व्याख्यात।
4) "तस्माद्विराड् अजायत..." इति मन्त्रानुसारं विराड्स्वरूपं वर्णयतु।
5) "अहं सोममाहनसं ..." इति मन्त्रं व्याख्यात।
6) "सहस्रशीर्षा पुरुषः..." इति मन्त्रं सायणभाष्यानुसारं विशदयत।
7) "अहं राष्ट्री संगमनी..." इति मन्त्रं सायणभाष्यानुसारं विवृणतु।

**C) अभीष्टान् त्रीन् विशदयत। 5x3=15**

1) "अहन्नहिं पर्वते शिश्रियाणं..." इति मन्त्रं स्वभाषया व्याख्यात।

2) पुरुषस्वरूपं विवृणतु।

3) पुरुषसूक्तानुसारं सृष्टिक्रमः वर्ण्यताम्।

4) "अहमेव स्वयमिदं वदामि..." इति मन्त्रं स्वभाषया विशदयत।

5) सृष्टेः पूर्वं जगतः स्वरूपं वर्णयतु।

**D) एकं प्रपञ्चयत।** **10x1=10**

1) निरुक्तशास्त्रोत्पत्तिकारणं निरूप्य षड् भावविकारान् निरूपयत।

2) मन्त्राणाम् अर्थः अस्तीति ग्रन्थकारपक्षं साधयत।

***

RKMVERI/DSS/MAIS/15-20/J2019/SK-315

**SK-315 Linguistics**

कालावधिः - होराद्वयम्                                                                                       पूर्णाङ्काः - 50

---

**A) षट्सु चत्वारि समाधत्त।                                                                                 5x4=20**

1) ध्वनिविज्ञानम् (phonology) परिचाययत।।
2) पदविज्ञानं परिचाययत।।
3) विभाषा (dialect)।
4) ग्रिम्स्-नियमं(Grimms law) वर्णयत।
5) अर्थपरिवर्तनं विशदयत।
6) श्लिष्टयोगात्मकभाषा।

**B) पञ्चसु त्रीणि समाधत्त।                                                                                 10x3=30**

1) भाषायाः स्वरूपं विवृणुत।
2) भाषापरिवर्त्तनस्य कारणानि प्रदर्शयत।
3) भाषायाः पारिवारिकवर्गीकरणं विवृणुत।
4) ध्वनिपरिवर्तनकारणानि निरूपयत।
5) संस्कृतध्वनिविज्ञानं वर्णयत।

***

RKMVERI/DSS/MAIS/16-21/J2019/SK-331

**SK-331 सांख्यकारिका(1-30 कारिकाः), योगसूत्रे समाधिपादः व्यासभाष्यसहितः च**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

## सांख्यकारिका

**A) अधः सप्तसु पञ्च समाधत्त। 1x5=5**

1) सांख्यशास्त्रविषयस्य अजिज्ञास्यत्वे प्रथमविकल्पः कः ?
2) स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः" केनेदं प्रोक्तम् ?
3) तमोगुणस्य प्रयोजनं किम् ?
4) अव्यक्तं भेदानां कारणमस्ति, कुतः ?
5) एकस्य सतः विवर्तः कार्यजातमिति केषां मतम् ?
6) महत्तत्वं कस्य प्रकृतिः ?
7) आनुश्रविक उपायो दृष्टोपायेन तुल्यः, कुतः ?

**B) नीचैः सप्तसु पञ्च समाधत्त। 3x5=15**

1) जहत्येनां भुक्तभोगां नुमस्तान्।
2) असदकरणादुपादानग्रहणात्।
3) दुःखत्रयाभिघातात् ......।
4) दृष्टवदानुश्रविकः...।
5) भेदानां परिमाणात्....।
6) अतिदूरात् सामीप्यात्...।
7) प्रमेयसिद्धिः प्रमाणाद्धि।

**C) अत्र द्वयोरेकं समाधत्त। 10x1=10**

1) पुरुषसिद्धिं प्रति कारणानि ग्रन्थदिशा प्रदर्श्य पुरुषबहुत्वं च साधयत।
2) सांख्यकारिकादिशा व्यक्ताव्यक्तज्ञानां स्वरूपं वर्णयत।

## योगसूत्रम्

**D) निम्नलिखितेषु सप्तसु पञ्च समाधत्त।। 1x5=5**

1) पञ्च क्लेशाः के।
2) काः चित्तभूमयः योगपक्षे न वर्तन्ते।
3) विवेकख्यातिर्नाम कः अर्थः।
4) युजिर् योगे, युज-समाधौ इत्यनयोर्मध्ये कस्मात् धातोः योगशब्दः व्युत्पादनीयः भाष्यकारमते।
5) आगमस्य लक्षणं किम्।
6) वृत्तिसारूप्यं कस्य भवति।
7) भूतानुग्रहः कस्य प्रयोजनम्।

**E) अधःप्रदत्तेषु पञ्चसु त्रीन् समाधत्त। 5x3=15**

1) तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः।
2) विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितीनिबन्धिनी।
3) अनुभूतविषयासम्प्रमोषः स्मृतिः।
4) श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्व इतरेषाम्।
5) शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।

***

## SK-342 तर्कसङ्ग्रहः दीपिकासहितः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) दीपिकायां द्रव्यादिसप्तान्यतमत्वमित्यस्य तात्पर्यं किम् ?
2) दीपिकायां गन्धवत्वमित्यनेन किं विवक्षितम् ?
3) प्राचीनानां मते त्र्यणुकादि नाशं प्रति किं कारणम् ?
4) ईश्वरसाधकमनुमानं किम् ?
5) पाकः नाम कः ?
6) अव्याप्यवृत्तित्वं नाम किम् ?
7) दीपिकायामन्यथासिद्धिः कति विधः ?
8) निर्वकल्पस्य दीपिकोक्तं लक्षणं किम् ?
9) अनुमितिप्रतिबन्धिका का ?
10) पञ्चावयववाक्ये किं नामोदहरणम् ?
11) लक्षाणा नाम किम् ?
12) वेदस्य पौरुषेयसाधकमनुमानं किम् ?

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) गुणानां चतुर्विंशतित्वं साधयत।
2) परमाणोः सत्तां निरूपयत।
3) रूपलक्षणं सदलप्रयोजनं लिखत।
4) गुणभूतशब्दलक्षणं दर्शयत।
5) तृतीयान्यथासिद्धिं निरूपयत।
6) स्वार्थानुमितिं निरूपयत।
7) अर्थापत्तिः कुतः न प्रमाणान्तरम् ?

**C) पञ्चसु त्रीन् समाधत्त। 5x3=15**

1) पृथिवीलक्षणं विवृणुत।

2) ईश्वरस्य सद्भावं यथाग्रन्थं प्रतिपादयत।

3) यथार्थायथार्थानुभवौ वर्णयत।

4) विशेषणविशेष्यभावसन्निकर्षं विवृणुत।

5) शक्तिस्वरूपं यथाग्रन्थं निरूपयत।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) दीपिकादिशा द्रव्यलक्षणं विवृणुत।

2) लक्षणां निरूपयत।

***

RKMVERI/DSS/MAIS/16-21/J2019/SK-345

## SK-345 मुक्तावल्याम् अनुमानशब्दखण्डौ

समयावधिः-एकहोरा पूर्णाङ्काः-५०

---

**A) दश समाधेयाः** **१ x १० = १०**

1) परामर्शानुमित्योः कार्यकारणभावं लिखत ?
2) व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतन्त्रतया कारणं चेत् को दोषः ?
3) पूर्वपक्षव्याप्तिं परित्यज्य सिद्धान्तव्याप्त्यनुसारणे किं प्रयोजनम् ?
4) के पञ्च दुष्टहेतवः ?
5) बाधस्य लक्षणं किं ?
6) दुष्टहेतुलक्षणं किम् ?
7) वैयाकरणमते आख्यातस्य कुत्र शक्तिः ?
